# M.A. Examination, 2025
## Semester-III
## Subject: Sanskrit
## (Indian Philosophy Group)
## Paper- IX (Athesit School)

Time: 3 Hours　　　　　　　　　　　　　　　　　　　　Full Marks-40

**Questions are of value as indicated in the margin**

1. संक्षेपेण  चार्वाकमतमुपस्थाप्य वेदस्य प्रामाण्यास्वीकारे तेषां युक्तिमुपस्थापयत। 10

अथवा

अधीतग्रन्थोक्तदिशा उपाधिस्वरूपं सोदाहरणमालोच्यताम्।

2. जैनमते तत्त्वानि संक्षेपेणालोच्यन्ताम्। 15

अथवा

सर्वदर्शनसंग्रहग्रन्थोक्तदिशा जैनसम्मतः सप्रभङ्गीनयो विशद्यताम्।

3. प्रतीत्यसमुत्पादस्य स्वरूपं यथायथं निरूपणीयम्। 10

अथवा

माध्यमिकमतानुसारेण कार्य्यकारणभाव उपपद्यते न वेति विचार्य्यताम्।

4. अधोलिखितयोः अन्यतरा कारिका व्याख्यायताम् - 5

(क) न हि स्वभावो भावानां प्रत्ययादिषु विद्यते।
अविद्यमाने स्वभावे परभावो न विद्यते।।

(ख) न च व्यस्तसमस्तेषु प्रत्ययेष्वस्ति तत्फलम्।
प्रत्ययेभ्यः कथं तच्च भवेन्न प्रत्ययेषु यत्।।

M.A. Examination, 2025
Semester-III
Subject: Sanskrit
(Indian Philosophy Group)
Paper- X (Nyāya Vaiśeṣika)

Time: 3 Hours                                                                 Full Marks-40

**Questions are of equal value**

षष्ठमविहाय यथेष्टं चतुरः प्रश्नानुत्तरयत।                                                   4×10=40

1. लक्षणोदाहरणाभ्यां समवायं परिष्कृत्य समवायसद्भावे प्रमाणं चोल्लिख्य सुष्ठु व्याख्यायताम्।

2. शरीरमनसोरात्मत्वमुपपद्यते न वेति विचार्यताम्।

3. अलौकिकसन्निकर्षाः सोदाहरणं प्रसाधनीयाः।

4. कारणलक्षणं विशदं व्याख्यायताम्।

5. व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः।
   रूपहानिरसम्बन्धो जातिबाधकसंग्रहः।।
   कारिकामिमां सोदाहरणं व्याख्यात।

6. व्याप्यत्वेन ज्ञायमानलिङ्गस्य करणत्वे दोषं विशद्य अनुमायां करणं व्यवस्थाप्यताम्।
   अथवा
   व्याप्तेः पूर्वपक्षलक्षणमालोच्यताम्, तस्य परित्यागे युक्तिः प्रदर्शनीया।

M.A. Examination, 2025
Semester-III
Subject: Sanskrit
(Indian Philosophy Group)
Paper- XI (Sāṁkhya)

Time: 3 Hours | Full Marks-40

**Questions are of value as indicated in the margin**

1. अधोनिर्दिष्टेषु प्रश्नेषु प्रश्नत्रयं समाधेयम् - 10×3=30

(क) सत्यपि दृष्टे चानुश्रविके चोपाये दुःखनिवृत्त्यर्थं सांख्यशास्त्रं कथमारम्भणीयमिति वाचस्पत्युक्ृतरीत्या प्रतिपादयत।

(ख) गुणानां स्वरूपं सांख्यतत्त्वकौमुद्युक्तदिशा प्रतिपादयत।

(ग) पुरुषास्तित्वसाधने सांख्यतत्त्वकौमुद्युक्ता युक्तयो व्याख्यायन्ताम्।

(घ) तत्त्वानां सृष्टिक्रमोऽधीतग्रन्थोक्तदिशा प्रतिपाद्यताम्।

(ङ) अव्यक्तसाधने सांख्यकारिकोक्ता युक्तयो व्याख्यायन्ताम्।

2. अधोनिर्दिष्टासु काप्येका कारिका व्याख्येया – 10×1=10

(क) प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु।।

(ख) चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।
तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।

# M.A. Examination, 2025
## Semester-III
## Subject: Sanskrit
## (Indian Philosophy Group)
## Paper- XII (Vedānta)

Time: 3 Hours | Full Marks-40

**Questions are of equal value**

चत्वार एव प्रश्नाः सुरगिरा समाधेयाः।    10×4=40

1. वाक्यजन्यज्ञाने चत्वारि कारणानि कानि? वेदान्तपरिभाषामनुसृत्य तानि सोदाहरणं प्रतिपाद्यन्ताम्।

2. धर्मराजाध्वरीन्द्रोक्तं विषयगतप्रत्यक्षलक्षणं निरूपणीयम्। ''रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः'' – इति पूर्वपक्षिणः शङ्का निरसनीया।

3. अर्थापत्तिप्रमाणस्य लक्षणं प्रतिपाद्यताम्। प्रमाणस्यास्य वैविध्यं वैशद्येनालोच्यताम्।

4. 'तच्च प्रत्यक्षं द्विविधं सविकल्पक-निर्विकल्पक-भेदात्' – वेदान्तपरिभाषादर्शितदिशा व्याख्यायताम्।

5. का नाम अन्तःकरणवृत्तिः? किमन्तःकरणं निरवयवमुत सावयवम्? अन्तःकरणस्य इन्द्रियत्वं वेदान्तदर्शने स्वीकृतं न वेति निश्चीयताम्।

6. ''अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या''- प्रतिपदव्यावृत्त्या व्याख्यायताम्। तृतीयलिङ्गपरामर्शः किमनुमितौ करणं न वेति वेदान्तसिद्धान्तः विचार्यताम्।